# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – अक्तुवर्, २०१९

कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) **प्रश्नपत्रम् –७** गुणाः - ७०

विषयः – पौरोहित्यम् **कोड – CE-359** समयः – ३.०० तः ६.००

दिनाङ्कः – 16 /10/2019 सन्दर्भग्रन्थः – याज्ञिकन्यायमाला

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम् ।** १०

**(१)** यज्ञीयस्तु विधिर्याज्ञस्तस्य वल्कस्त्वचा बहिः ।
दृश्यं रूपं याज्ञवल्क्यस्तृणः सुयवसं मतम् ॥

**(२)** हस्तहिनं तु योऽधीते स्वरवर्ण विवर्जितम् ।
ऋग्यजु: सामभिर्दग्धो वियोनिमधिगच्छति ॥

(३) अनुपेताः स्त्रियः शूद्रा निर्मन्त्रं कर्मकारिणः ।
तेषां कृते श्लोकवाक्यप्रयोगोऽस्त्युचितो न वा ॥

**प्रश्नः – २ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत ।** १०

(१)**ब्राह्मणापौरुषेयतासाधनाधिकरणं प्रतिपादयत ।**

(२)**पूर्णशाखाध्ययननित्यतानिराकरणाधिकरणं विवेचयत ।**

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ अधोलिखितेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम् ।** १०

(१)ज्ञापकं परशाखीयपदार्थग्रहणे स्फुटम् ।
तस्मात् स्वशाखान्यशाखाविध्योरपि समुच्चयः ॥

(२) मन्त्रपाठं निषेधेत्तु तेनामन्त्रैव तत्क्रिया ।
आवृदेव यथा स्त्रीणां निर्मन्त्रापूर्वदायिनी ॥

(३) न तिष्ठति तु यः पूर्वां नोपास्ते यश्च यश्चिमाम् ।
स शूद्रवद् बहिष्कार्यः सर्वस्माद् द्विजकर्मणः ॥

**प्रश्नः – निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत ।** १०

४

(१)स्वशाखीयविधे: प्राबल्यस्य कारणानि विचार्यताम्

(२)आचारसमुच्चयाधिकरणं यथाशास्त्रं व्याख्यायताम् ।

## तृतीयान्वितिः (Unit-3)

**प्रश्नः – ५ अधोलिखितेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम् ।** १०

(१) शतचण्डीमखे वृत्वा दशसंख्याकवाऽवान् ।
वृद्धिक्रमेण कुर्वीत पञ्चाह:सु समापनम् ॥

(२) पुराणस्मृतिबोध्येषु पाकयज्ञत्वकल्पना ।
न युज्यते वा, न युक्ता लक्षणासहात् ॥

(३) मा हिंस्यादिति वाक्यस्य मांसभक्षणवर्जने ।
तात्पर्याच्च सदाकालं मांसं त्याज्यं तु भक्षणे ॥

**प्रश्नः – ६ निम्नलिखितयोः कस्यचिद् एकस्य निबन्धात्मकम् उत्तरं लिखत ।** १०

**(१)दक्षिणापरिमाणाधिकारणं याज्ञिकन्यायमालादृष्ट्या विवृणुत**

(२)यज्ञविवाहमधुपर्के मांसनित्यतानिराकरणाधिकरणस्योपरि एकं निबन्धं लिखत ।

**प्रश्नः – ७ अधोलिखितेषु केषाञ्चन दश प्रश्नानाम् अतिलघूत्तरं लिखत ।** १०

१) कति स्नातका: भवन्ति ?
२) ब्राह्मणस्य उपनयनकाल: क: ?
३) स्त्रीणां वेदाध्ययने अधिकार : अस्ति न वा: ?
४) ' मख ' इति शब्दस्य कोऽर्थ : ?
५) अन्तोदात्त वेदशब्दस्य कोऽर्थ: ?
(७) पुराणानि धर्मे प्रमाणं न वा ?
(८) महाभारतस्य समावेश: पुराणेषु भवति इतिहासेषु वा ?
(९) "इन्द्रशब्देन आहवनीय: " - इति कस्य वचनम् ?
(१०) तृतीयाध्याये कति अधिकरणानि सन्ति ?
(११) कोटिहोमलक्षजपादिकर्मणि कति ऋत्विज: भवन्ति ?
(१२) प्रणीताप्रणयनम् अग्ने: कस्यां दिशि भवति ?
(१३) प्रदोषव्रत: कदा करणीय: ?
(१४) "उच्चैः साम्ना:" इति वचनं कुत्र श्रूयते ?
(१५) ब्रह्मण: अभावे यज्ञकर्मणि ब्रह्मासने कस्य स्थापनं भवति ?
(१६) कति पाकयज्ञा: ?

***

## `Answer Key

| | | |
|---|---|---|
| कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) | **प्रश्नपत्रम् –७** | गुणाः - ७० |
| विषयः – पौरोहित्यम् | **कोड – CE-359** | समयः – |
| दिनाङ्कः – | सन्दर्भग्रन्थः – याज्ञिकन्यायमाला | |

**प्रश्नः – ७**

(१) कति स्नातका: भवन्ति ? त्रयः स्नातकाः , विद्यास्नातक, व्रतस्नातक, विद्याव्रतस्नातक

(२) ब्राह्मणस्य उपनयनकाल: क: ? वसन्तः

(३) स्त्रीणां वेदाध्ययने अधिकार : अस्ति न वा: ? अस्ति, परन्तु उपनयनसंस्कारः भवति चेत्

(४) ' मख ' इति शब्दस्य कोऽर्थ : ? यज्ञः

(५) अन्तोदात्त वेदशब्दस्य कोऽर्थ: ? दर्भवाचकः

(६) पुराणानि धर्मे प्रमाणं न वा ? प्रमाणम्

(७) महाभारतस्य समावेश: पुराणेषु भवति इतिहासेषु वा ? इतिहासेषु

(८) “इन्द्रशब्देन आहवनीय ” - इति कस्य वचनम् ? उव्वटस्य

(९) तृतीयाध्याये कति अधिकरणानि सन्ति ? १२

(१०) कोटिहोमलक्षजपादिकर्मणि कति ऋत्विज: भवन्ति ?

(११) प्रणीताप्रणयनम् अग्ने: कस्यां दिशि भवति ? उत्तरस्यां दिशि

(१२) प्रदोषव्रत: कदा करणीय: ? द्वादशत्रयोदश्यां संयोगे

(१३) “उच्चैः साम्ना:” इति वचनं कुत्र श्रूयते ? ऐतरेय ब्राह्मणम्

(१४) ब्रम्हण: अभावे यज्ञकर्मणि ब्रह्मासने कस्य स्थापनं भवति ? दर्भासनस्य

(१५) कति पाकयज्ञा: ? सप्त